सरोमदेहः पुरुषोऽतिदीर्घः
प्रकाण्डगण्डस्त्वतिगण्डजन्मा" ॥
इति कोष्ठीप्रदीपः ।

अतिगन्धः, पुं, (अतिरिक्तो गन्धो यस्य सः ।) भूतटणं । चम्पकः । मुद्गरवृक्षः । गन्धकः । इति राजनिर्घण्टः ॥ (अतिगर्व्वितः ।)

अतिगन्धालुः, पुं, (अतिगन्धो विद्यतेऽस्य अतिगन्ध + मत्वर्थे आलु । अतिशयितगन्धयुक्ते) पुत्रदात्रीलता । इति राजनिर्घण्टः ॥

अतिगर्व्वितः, त्रि, (अति अधिको गर्व्वः कर्म्मधारयः सोऽस्य जातः अतिगर्व्व + इतच् ।) महाहङ्कृतः । अतिशयगर्व्वयुक्तः । तत्पर्य्यायः । समुद्रङ्कः २ । इति हलायुधः ॥

अतिगुहा, स्त्री, (गुहामतिक्रान्ता कुगतिप्रादीति समासः ।) पृश्निपर्णीविशेषः । चुड़चाकुलिया इति भाषा । इति रत्नमाला ॥ गुहातिक्रामके त्रि ॥

अतिचरा, स्त्री, (गन्धविस्तारेण स्वस्थानमतिक्रम्य चरति गच्छतीव अति चर + कर्त्तरि अच् स्त्रियां टाप् ।) पद्मचारिणीवृक्षः । स्थलपद्मिनी । इत्यमरः ॥ राजनिर्घण्टश्च ॥

अतिचारः, पुं, (अतिक्रम्य चरणं गमनम् अति + चर + भावे घञ् ।) शीघ्रगमनं । अतिक्रम्य गमनं । कुजादिपञ्चग्रहाणां राशिभोगकालासमाप्तौ राश्यन्तरगमनं । तत्र पूर्ब्बराशिगमने वक्रातिचारः । परराशिगमने अतिचारः । एतौ गुरोश्चेदकालो भवति । गुरुस्तु यदि पुनः पूर्ब्बराशिं नायाति तदा महातिचारः । तेन लुप्तसम्वत्सरो भवति । ग्रहाणां स्वभोज्यमानराशावपि वक्रातिचारौ भवतः ॥ तत्र नाकालः । इति स्मृतिज्योतिषे ॥

अतिच्छत्रः, पुं, (छाद्यते आच्छाद्यतेऽनेन छद + णिच् + करणे ष्ट्रन् । अतिक्रान्तश्छत्रम् इति व्युत्पत्त्या छत्रातिक्रमकारी ।) भूतटणं । इति राजनिर्घण्टः ॥ जलतृणविशेषः । अश्वगन्धकुल्या-खाड़ा इति ख्यातः । इति रत्नमाला ॥ छत्रा । काटछाति । भुँइछाति । पोयालछाति इति ख्याता । इत्यमरः ॥

अतिच्छत्रकः, पुं, (अति + छत्र + स्वार्थे कन्) छत्रवृक्षः । छातारियाविष इति ख्यातः । तस्य मूले पत्रे वचाकारः कटुरसश्च । इति रत्नमाला ॥ भूतटणं । इति राजनिर्घण्टः ॥

अतिच्छत्रा, स्त्री, (छत्रमतिक्रान्ता, अत्यादय इति समासः ।) अवाक्पुष्पी । मौरी इति ख्याता । इत्यमरः ॥ शताङ्गा । शलुपा इति प्रसिद्धा । इति रत्नमाला ॥ (छत्रातिछत्रे लाङ्गलीं जटिलां ब्रह्मचारिणीं ॥ इति सुश्रुते ॥)

अतिजवः, त्रि, (अतिशयितो जवो वेगो यस्य सः ।) अतिशीघ्रगामी । अतिवेगवान् । (दवयदतिजवेन प्राप्तमुर्व्वीविभागं ॥ इति भट्टिकाव्ये) ॥ तत्पर्य्यायः । जङ्घालः २ । इत्यमरः ॥ जङ्घिलः ३ अतिबलः ४ । इति तट्टीका ॥

अतिजागरः, पुं, (जागृ + भावे घञ् अतिशयितो जागरो जागरणं यस्य सः । अतिजागरणयुक्ते त्रि ।) नीलक्रौञ्चः । कालवकः । इति राजनिर्घण्टः ॥

अतिडीनं, क्ली, (डी + भावे क्तः तस्य नः । अत्यन्त डीनं गमनं कर्म्मधारयः ।) पक्षिणां प्रचण्डगमनं । इति महाभारतं ॥

अतितीव्रा, स्त्री, (अतिशयेन तीव्रा) गण्डदूर्व्वा । इति राजनिर्घण्टः ॥

अतिथिः, पुं, कुशपुत्रः । स च श्रीरामचन्द्रस्य पौत्रः । इति मेदिनी ॥ कोपः । इति विश्वः ॥

अतिथिः, त्रि, (अतति सातत्येन गच्छति न तिष्ठति अत् + इथिन्) अज्ञातपूर्ब्बगृहागतव्यक्तिः । इति श्रीधरस्वामी ॥ अतिथ् इति भाषा । तत्पर्य्यायः । आगन्तुः २ आवेशिकः ३ गृहागतः ४ । इत्यमरः ॥ स्त्रीलिङ्गे आवेशिकी ५ अतिथी ६ । इति तट्टीकासारसुन्दरी ॥ आगान्तुः ७ । इति हट्टचन्द्रः । प्रघूर्णः ८ अभ्यागतः ९ प्राघूर्णिकः १० । इति हेमचन्द्रः ॥ प्राघुणिकः ११ । इति विश्वः ॥ प्राघुणः १२ । इति त्रिकाण्डशेषः ॥ * ॥ तस्य लक्षणं । यस्य न ज्ञायते नाम न च गोत्रं न च स्थितिः । अकस्मात् गृहमायाति सोऽतिथिः प्रोच्यते बुधैः ॥ • ॥ तस्य निवर्त्तने गृहस्थस्य दोषः यथा,—

"अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्त्तते ।
स तस्मै दुष्कृतं दत्त्वा पुण्यमादाय गच्छति" ॥

इति पुराणं ॥ * ॥ तस्य ग्रहणकालः । "ततो गोदोहमात्रन्तु कालं तिष्ठेद्गृहाङ्गने । अतिथिग्रहणार्थाय तदूर्द्ध्वं वा यदृच्छया" ॥ इति विष्णुपुराणं ॥ * ॥ गोदोहकालश्च मुहूर्त्ताष्टमभागः । यथा । "आचम्य च ततः कुर्य्यात् प्राज्ञो द्वारावलोकनं । मुहूर्त्तस्याष्टमं भागमुद्वीक्ष्यो ह्यतिथिर्भवेत्" ॥ इति मार्कण्डेयपुराणं ॥ * ॥ तस्य मूर्खत्वादिविचारो नास्ति । "प्रियो वा यदि वा द्वेष्यो मूर्खः पतित एव वा । संप्राप्ते वैश्वदेवान्ते सोऽतिथिः स्वर्गसंक्रमः" ॥ इति शातातपः ॥ * ॥ तस्य वेदादयो न प्रष्टव्याः ।

"स्वाध्यायगोत्रचरणमपृष्ट्वापि तथा कुलं ।
हिरण्यगर्भबुद्ध्या तं मन्येताभ्यागतं गृही" ॥

इति विष्णुपुराणं ॥ * ॥ तस्य देशादौ पृष्टे दोषः ।

"देशं नाम कुलं विद्यां पृष्ट्वा योऽन्नं प्रयच्छति ।
न स तत्फलमाप्नोति दत्त्वा स्वर्गं न गच्छति" ॥

इति स्मृतिः ॥ * ॥ अतिथये शक्त्यनुसारेण दातव्यं ।

"भोजनं हन्तकारं वा अग्रं भिक्षामथापि वा ।
अदत्त्वा नैव भोक्तव्यं यथा विभवमात्मनः" ॥

इति मार्कण्डेयपुराणं ॥ * ॥ भिक्षादिलक्षणं ।

"ग्रासप्रमाणा भिक्षास्यादग्रं ग्रासचतुष्टयं ।
अग्राच्चतुर्गुणं प्राहुर्हन्तकारं द्विजोत्तमाः" ॥

इति मार्कण्डेयपुराणम् ॥ इत्याह्निकतत्त्वं ॥

अतिथिपूजनं, क्ली, (अतिथेः पूजनं सेवा षष्ठीतत्पुरुषः ।) अतिथिसेवा । आतिथ्यक्रिया । तत्पर्य्यायः । नृयज्ञः २ । इति हेमचन्द्रः ॥

अतिदानं, क्ली, (दा + भावे ल्युट्, अत्यन्तं दानं स्वसत्वध्वंसपूर्ब्बकपरस्वत्वोत्पत्तिः, कर्म्मधारयः ।) बहुदानं । अपरिमितदानं । यथा,—

"अतिदाने बलिर्बद्धः अतिमाने च कौरवाः ।
अतिरूपे हृता सीता सर्व्वमत्यन्तगर्हितम्" ॥

इति चाणक्यः ॥

अतिदिष्टः, त्रि, (अति + दिश् + क्तः । अन्यधर्म्माणामन्यत्रारोपणमतिदेशः यथा,—"तिङ्शित् सार्व्वधातुकमित्यातिदेशिकसूत्रम् ।) अतिदेशविशिष्टः । यथा,—"न समानगोत्रां भार्य्यां विन्देतेत्यनेन शूद्रस्यापि सगोत्रा कथं न निषिध्यते" इति चेदत्र उपदिष्टातिदिष्टगोत्रस्यैव निषेधो नत्वतिदिष्टातिदिष्टशूद्रगोत्रादेः । इत्युद्वाहतत्त्वं ॥

अतिदीप्यः, पुं, (अत्यन्तं दीप्यते विचित्रवर्णतया आत्मना प्रकाश्यते अति + दीप् + कर्त्तरि ण्यत् ।) रक्तचित्रकवृक्षः । इति राजनिर्घण्टः ॥

अतिदेशः, पुं, (अति + दिश् + भावे घञ्) अन्यधर्म्मस्यान्यत्र आरोपणं । यथा,—"इणवदिकः" इत्यादिः । इति दुर्गादासः ॥ कारिका यथा,—

"प्रकृतात् कर्म्मणो यस्मात् तत्समानेषु कर्म्मसु ।
धर्म्मोऽतिदिश्यते येन अतिदेशः स उच्यते" ॥

इति मलमासतत्त्वम् ॥ स तु पञ्चविधः । शास्त्रातिदेशः । १ यथा,—"नित्येन तुल्यं शेषं स्यात्" इत्यत्र तुल्यशब्देन अतिदेशः" । १ । कार्य्यातिदेशः २ यथा,—"अप्रयाजास्ताः इत्यत्र कार्य्येण निषेधेन दर्शपौर्णमासधर्म्मातिदेशः" । २ । निमित्तातिदेशः ३ यथा,—"विकृतौ मौद्गचरुयागे व्रीहिकार्य्यकारिणि मुद्गे व्रीहिकार्य्यनिमित्तत्वात् धर्म्माः प्रोक्षणादयः कल्प्यन्ते" । ३ । व्यपदेशातिदेशः ४ यथा,—"मासमग्निहोत्रं जुहोति इत्यत्र माससाध्यायनाख्ययागे अग्निहोत्रपदव्यपदेशात् अग्निहोत्रधर्म्मातिदेशः" । ४ । "रूपातिदेशः" ५ यथा,—"यजमानाद्भिन्नो यूपः इत्यत्र यूपे यजमानादन्यत्वरूपावगमात् यजमानधर्म्मस्य तदीयपरिमाणस्यातिदेशः" । इति श्राद्धविवेकटीकायां श्रीकृष्णः ॥

अतिनु, त्रि, (कुगतिप्रादीतिसमासः । गोस्त्रियोरुपसर्ज्जनस्येति ह्रस्वः ।) अतीतनौकं । नावमतिक्रान्तं । नावोत्तीर्णं । इत्यमरः । तस्य पुंस्त्रीलिङ्गयोः अतिनौः इति रूपं ॥

अतिपतनं, क्ली, (अति + पत् + भावे ल्युट्) अत्ययः । अतिक्रमणं । इति शब्दरत्नावली ॥

अतिपन्थाः [न्] पुं, (अत्युत्कृष्टः पन्थाः कर्म्मधारयः । अतेः पूजार्थत्वान्न समासान्तप्रत्ययः ।) सन्मार्गः । सुपथः । इत्यमरः ॥

अतिपत्रः, पुं, (अतिरिक्तं पत्रं यस्य सः बहुव्रीहिः ।) हस्तिकन्दवृक्षः । शाकवृक्षः । इति राजनिर्घण्टः ॥

अतिपातः, पुं, (अति + पत् + भावे घञ्) अतिक्रमः । उपात्ययः । पर्य्ययः । इत्यमरः ॥ (यथा शाकुन्तले—न चेदन्यकार्य्यातिपातः) ॥

अतिपातकं, क्ली, (अतिदुष्टतया अन्यत् पातकं पापमतिक्रान्तं प्रादिसमासः ।) नवविधपापमध्ये गुरुतरपातकं । तत् त्रिविधं । पुंसः मातृदुहितृ-